**MAHARSHI DAYANAND SARASWATI UNIVERSITY**

**AJMER**

**7th days textual work shop on**

**An Analysis of Narada and Shandilya 's Bhakti Sutras (Aphorisms of Narada And shandilya )**

**नारदएवंशांडिल्यकेभक्तिसूत्र : एकविश्लेषण**

**Funded by ICPR,New Delhi**

## Introduction:

Devotion is not a sentimentally drivel nor emotion but a scientific process of reaching God or commitment to God in thorough words ,deeds. The Spiritual powers of the man should be awakened and directed towards obtaining the divine bliss without self-realization or God's realization. Life becomes a waste as a diamond in the hands of a fisherman who finds a new pond where he caught a bundle of diamonds not realizing their values, he allowed his son to play with them and his son used them to through one by one inside the lake. The wife of fisherman takes one of them unknowingly with her things where one man could assess their worth.

Sages had led the ways of to seek God for securing spiritual benefits but we are like the fisher man who neglects the importance. The devotee practices Sadhana to seek God it implies an approach considering of Bhakti Shradda, Dhyana and Yoga. Dhyana or meditation should be centralized on Truth and on transcendental values. Devotion knows no caste or creed. The term devotion has been amply defined in the spiritual classics like the Bhagavatham, Narada and Shadilya Bhakti Sutras with illustrations.

**Objectives of the work shop** :The workshop is an analytical study of the Vedic Devotional texts of the aphorisms of the Sages Narada and Shandilya. Narada and Shandilya's aphorisms are the precious gems of the Indian ancient devotional literature, a guide book for life on indispensable companion, for all sincere seekers after God and the divine life, the very best need of the present postmodern hour. This work shop dwells the depth of various Indian devotional methods of meditation ,peace depicted in those Aphorism suggesting ,emphasizing the need of practices of devotion which was practiced by our National Indian Sages. Merely going to temple without having purity in mind is utter waste. How the genuine love must be created with God through Prema Bhakti, Navdha Bhakti and Ragaanuga Bhakti emphasized by our ancient sages.

**How the practices of devotion gives bliss,or the eternal happy?**

**How one can achieve divinity living between the worldly pleasures like the drop of water on the Lotus leaf?**

**How to concentrate the mind on the Lotus feet of the Lord ?**

**Byself less rendering service to humanity,by glorifying the namasankeertna,by adopting paropkaaraarthmidamshareerampinciples….depicted in Vedic texts.**

What is the ultimate goal of life?

All these questions will be well discussed in their classes on these devotional Sanskrit texts by eminent Sanskrit scholars in the work shop.

The Bhakti Sutras of NaradaMaharshi is a group of eighty four recondite devotional sayings. The affinity or the undefined genuine love or supreme divine love Prema Bhakti is the essence of these aphorisms. Narada describes various stages of Bhakti a pre-mature stage (Apara Bhakti) and a mature stage of devotion Para Bhakti. The devotee who possesses the perfect self-realization or God realization expresses through his moods, thoughts, words, actions and deeds are called the objective aspect of Para Bhakti.

The first Chapter deals with the aspects of Para Bhakti in twenty four (24) solemn and lucid aphorisms. In the 2nd chapter this Para Bhakti is extolled as superior to all spiritual disciplines and all who are aspiring after liberation are exhorted to seek after that and that alone. The Third chapter deals with much psychological insight the moral rules and spiritual discipline of Vaidha Bhakti. The fourth Chapter describes about the characters and behavior of Raga Bhakti devotee in which God-Realization is immediate and inevitable. The last chapter i.e. 5th one depicts how Mukhya-Bhakti lives in the world, how he satisfies all being what blessing, societies derives from him and how God reveals Himself as his most beloved self, how this Mukhya-Bhakti transforms into Para Bhakti.

The divine sage Narada declares the entire humanity through his auspicious gospel, with the anxiety of a great savior the existence of immortal divine Bliss as the birth right of all admonishes of sense life, instructs the devotee about the various methods by which he may attain the spiritual goal. The experiences of the devotee after achieving the spiritual bliss and stresses towards the one-pointed love of God. On God's unconditional Grace, by the power of which devotee attains freedom from this samsara (mortal world).

In the 1st chapter the very first Sloka which reads as,

हरि ॐ | अथातो भक्तिं व्याख्यास्याम

He starts to expound the religion of divine love. He describes Bhakti or devotion as

सा त्वस्मिन पर(म) प्रेमस्वरूपा
अमृत स्वरूपा च
(Devotion is the supreme love of God the essential form of अमृत (the nectar).)

After giving a vast explanation with example he concludes in his 82 aphorisms with a conclusion that whomsoever amongst us believes in the auspicious gospel of Narada and has faith in it, becomes a lover of God and attains the highest goal of love i.e.solvation.

Sri Shandilya is an equally great sage of the ancient devotional texts, his name found in SatapathaBrahmana. In BrihadAranyakUpanishad we find him in the line of Vedic Rishis, and in the Chandogya Upanishad. We find the vital lesson given by him whichaffirms the glorious path of devotion to the all Blissful Supreme God head. Shandilya's Bhakti Sutras were one hundred in number where he gives an unambiguous doctrine of unalloyed Bhakti. Like Narada he also stresses on satsang –Bhakti gets manifested in the soul. Bhakti is transcendental process and Srinamasamkritana is the best which brings ecstasy. He deals with philosophy to a great extent.

Gnana is the Inductive process and Bhakti is the deductive process. Without becoming subjugated to Bhakti Gnana or yoga or karma cannot produce any real spiritual result. He established the doctrine of अचिन्त्य-भेद-अभेद- theory. Though God creates the universe through His own external potency (Maya) but he ever remains immutable because He is सत - चित - आनंद स्वरूपा | Neither Jiva nor Prakruti nor they both mutually create or procreate nor can they have their existence without the superintending of the God. Like Narada Sri Shandilya emphatically proclaims that Bhakti is unprecedented. Karma and Gnana have got their relative values when they are in conformity with Bhakti.

सा पराडनूरक्तिरीश्वर - २

(Bhakti is the unshakable attachment to the Supreme God)

When unalloyed devotion rules the heart then and then alone one goes beyond to the life of transmigration. He explains elaborately about **रागानुजा भक्ति |**

The journey ends in a dancing field of brilliant and eternal spring sweet scented Love and abounding peace. Ah, back to God and Back to home, yea, I attain the abode of Eternal Bliss.Here ends the Shandilya Bhakti Sutra

**<u>Need of the work shop</u> :**Today with the rapid progress ofscientific culture most people have forgotten their truenature, divinity because 'scientifically' it cannot be proved. With the rapid growth of scientific growth people are living in the web world having more attracted to face book ,what's up ,twitter ,mobiles,selfies. They don't have to spend few hours with mental peace.How to achieve "Param Shanti "? No answer. The result is early heart attacks because of work stress ,tension no time for meditation and Yoga. They are ignorant of true purpose of life which is spiritual ,self-realization or God _realization ,self awakening. Now a days under the narrow definition offreedom and with the postmodern western concept of'individualism' people lost their ethical values of life likesolidarity, natural love, forbearance, compassion, generosity,and morality.Hinduism believes that it is an undeniable factthat in the evolution of history of human culture andcivilization, spiritual force plays an important role. Through Vedic ancient textual study whichgives importance to the motto of work as worship or serviceto humanity is service to God "Naraseva Narayan seva". Themost prominent and enduring characteristic of the Indianattitude is

spirituality. Narada and Shandily bhakti Sutra play a role of Catalysts to purify the soul which dips in the path of devotion to achieve salvation ie The Moksha.Indian thought has placed Dharma or the principle of righteousness and virtue as the primaryvalue. This Dharma is a multiple concept and includes those principles of virtuous conduct, goodness, morality and truth.The Vedantic approach and the tolerance if fostered becamethe tonic note of the Indian symphony. A direct outcome ofnon-alignment, of " Live and let Live" is the doctrine ofAhimsa ,non violence. Ahimsa is called the highest virtue orway of life.To achieve this one's mind must be pure and have the sense of equality samadarshan.

Ways of devotion well expressed textually through these Aphorisms and it clearly indicates that merely chanting the names of God with concentration gives eternal pleasure and mental peace which is the need of the present era.

Annexure 2(b)

Sub-title or allied aspects of the theme/area in which papers from contributors will be invited

1. Narada bhakti sutra – A path shower to Indian devotees
2. Structure of Devotion –bhakti kaswaroop in Narada bhakti sutra
3. Structure of Devotion –bhakti kaswaroop in Shandilya sutras
4. Relevance of Shandilya bhakti sutra in Modern era.
5. Features of Para Bhakti
6. Features of apara bhakti
7. Anany Bhakti :
8. Devotional practices depicted in the aphorisms of Narada
9. Vedic literature and Bhakti sutra
10. Types of Devotion
11. Prema bhakti and its features
12. Navadha bhakti and its importance
13. Emotions of Devotee after attaining prapaththiwad
14. Any topic relevant to Narada and Shandilya 's Bhakti sutras

**Advisory Board : Course coordinator : Prof. ArknathChoudhry,Hon'ble V.C Somnath Sanskrit Vishwvidyalaya**

१. प्रो.रमेशकुमारपान्डेय, कुलपति, लालबहदुरशास्त्रिराष्ट्रियसंस्कृतविद्यापीठम्, समविश्वविद्यालय, बी-४, कुतुब्सांस्थानिकक्षेत्र, नई दिल्ली-११००१६दू.भा.सं.०९८१०२०७०६३

२. प्रो.प.ना.शास्त्री, कुलपति, राष्ट्रियसंस्कृतसंस्थानम्, समविश्वविद्यालय, मानवसंसाधनविकासमन्त्रालयकेअधीनस्थ, ५६-५७, सांस्थानिकक्षेत्र, जनकपुरी, नई दिल्ली-११००५८, चू.भा.सं.०८१३०४९४२२२, ०९४२५६८२२७१

३. प्रो.पीयूषकान्तदीक्षित, कुलपति, उत्तराखण्डसंस्कृतविश्वविद्यालय, हरिद्वार, उत्तराखण्ड, दू.भा.सं.०९८१००६१९५१

४ .प्रो .रमाकांत पांडेय,निर्देशक ,मुक्त स्वाध्याय पीठं राष्ट्रीय संस्कृत संस्थान ,नयी दिल्ली

५. प्रो.रमेशचन्द्रपण्डा, कुलपति, महर्षिपाणिनिसंस्कृतविश्वविद्यालय, उज्जैन, मध्यप्रदेश।दू.भा.सं.०९४१५९९२१०८

६. प्रो .नंदकिशोर पाण्डेय ,निर्देशक ,केन्द्रीय हिंदी संसथान आगरा |

Resource Persons &Participants :

(१) प्रो.देवेन्द्रनाथ पाण्डेयः (वेदविभागाध्यक्षः, श्रीसोमनाथसंस्कृतविश्वविद्यालयः)
(२) डॉ.नरेन्द्रकुमार एल्. पण्ड्या
( प्राचार्यः, श्रीसोमनाथसंस्कृतविश्वविद्यालयसञ्चालित संस्कृत कॉलेज)
(३) डॉ.अमृतलालभोगायता (पुराणसङ्कायाध्यक्षः, सोमनाथसंस्कृतविश्वविद्यालयः)
(४) डॉ.शत्रुघ्नपाणिग्राही (वेदवेदाङ्गसङ्कायाध्यक्षः, सोमनाथसंस्कृतविश्वविद्यालयः)
(५) डॉ पङ्कज एस्. रावलः
(आसि. प्रोफेसर. श्रीसोमनाथसंस्कृतविश्वविद्यालयसञ्चालित संस्कृत कॉलेज)
(६) प्रो. गौतमभाई पटेलः
(७) प्रो. विजय पण्ड्या (सेवानिवृत – आचार्यः गुजरातविश्वविद्यालयः)
(८) प्रो. रविन्द्रनाथ पण्डा ( एम्.एस्. विश्वविद्यालय, वडोदरा, गुजरात)
(९) प्रो. रामराज उपाध्याय (श्रीललबहादुरशास्त्रीकेन्द्रियसंस्कृतविद्यापीठम्, नई दिल्ली)
(१०) डॉ. सुन्दरनारायण झा (श्रीललबहादुरशास्त्रीकेन्द्रियसंस्कृतविद्यापीठम्, नई दिल्ली)
(११ ).प्रो .रेणुका राठौड़ _निर्देशक संस्कृत अकादेमी ,जयपुर

**प्रतिभागी गण :**

१- डॉ. विश्वनाथस्वाईं

प्राचार्य, श्री जगन्नाथवेद कर्मकाण्डमहाविद्यालय, स्वर्गद्वाररोड,पुरी,
ओडिशा -७५२००१

Mob- 07377318983

Email- pracisudha2013@gmail.com

२- डॉ. रामपालशुक्लः
बरोडासंस्कृतमहाविद्यालय, प्रतापगन्ज, बरोडा, गुजरात

Mob-9725447631

३- डॉ. कपिलदेवशास्त्री , आसि. प्रोफेसर
बरोडासंस्कृतमहाविद्यालय, प्रतापगन्ज, बरोडा, गुजरात

Mob- 09924573029

Email- drkapildevshastri@gmail.com

४- डॉ. भावप्रकाश एम्. गान्धी, आसि. प्रोफेसर

Mob-9924850091

Email- bhavprakashgandhi@gmail.com

५- डॉ. निरञ्जनमिश्रः, आसि. प्रोफेसर
राष्ट्रियसस्कृतसंस्थान, तिरुपति -५१७५०७

Mob. 8125937739

६- डॉ.सोमनाथदाशः, आसि. प्रोफेसर

राष्ट्रियसस्कृतसंस्थान, तिरुपति -५१७५०७

Mob- 08019305009

७- डॉ. गिरिधारी पण्डा, आसि. प्रोफेसर
मेदिनापुरकालेज्, बेनेपुकर, हबिबपुर, मेदिनापुर
जिल्ला- पश्चिममेदिनापुर, पश्चिमबंगाल

M0b-09800045250

Email- drgiridharipanda@gmail.com

८- डॉ. चन्द्रकान्तपण्डा, आसि. प्रोफेसर

B.T.M College. Post- Barabhum, Ps- Barabajar

Dist- Puriliya, West Bengal

Email- ckpanda0203@gmail.com

०९ -डॉ. जगमोहन आचार्य , आसि. प्रोफेसर ,Kharagpur college, At/po- Inda

Ps- Kharagpur ,WestBngal , Mob- 09002231586

१० . डॉ. सङ्कल्पमिश्र, आसि. प्रोफेसर Dept. of Veda, maharshi Panini Sanskrit Evam Vedic University, Ujjain, M.P Mob- 08827087772,Email- sankalpajpr@yahoo.com

११. ज्ञानेन्द्र त्रिपाठी , आसि. प्रोफेसर

Email- pracisudha2013@gmail.com

१२ . डॉ. काह्नुचरण पण्डा

प्राचार्य, रामाधिन संस्कृतकालेज, ब्रह्मपुर, गञ्जाम, ओडिशा

१३. डॉ. गजेन्द्रकुमार पण्डा,

संस्कृतविभाग, L.D. Arts College, Ahmedabad

Mob- 09228224797,

Email- gajendrapanda1964@gmail.com

१४ . डॉ. सनत कुमार रथ, आसि. प्रोफेसर

विश्व भारति विश्वविद्यालय

शान्तिनिकेतन- ७३१२३५, Mob- 09832223973

Email- shodhasamiksha74@gmail.com

१४ . जानकिशरण आचार्य, आसि. प्रोफेसर

श्रीसोमनाथसंस्कृतविश्वविद्यालय, वेरावलम्

Email- janakisharan@gmail.com

१५ .डा .नृसिंहप्रसादगुरु, आसि. प्रोफेसर

Mob- 09861442233, Email- nrusinghaguru@gmail.com

१६ .University of Hyderabad Sanskrit –Dept.

apksh@uohyd.emet.inprasadsh@uohyd.emet.in

१७ .Dr.doddasheshubabu : Moulana Azad National Urdu university,Hyb

१८ .Dr.Siddaarth –coordinator,Hindi Dept. CUH

१९ .Dr.kanhaiyaTripathi,Centraluniversity,Sagar

२० .Dr.SriRamParihar,Khandwa ,M.P

15 –Rajasthan delegates will be included from Dept.of Sanskrit only.

Total delegates limit:30-40

# अध्याय - १

## शाण्डिल्य भक्तिसूत्र ,प्रथमाध्याय-प्रथमाह्निक-व्याख्या

धर्मार्थकाममोक्ष इन चतुर्विध पुरुषार्थों में परमपुरुशार्थ की प्राप्ति के अनेकविध साधन बताए गये हैं । उन साधनों में सार्वजन-सुलभ साधन भक्ति को स्वीकार किया गया है । अतः भक्ति क्या है,भक्ति का स्वरूप क्या है, भक्ति के कितने प्रकार हैं ? इत्यादि प्रश्नों के समाधान हेतु महर्षि शाण्डिल्य ने भक्ति-सूत्र की रचना की है । ग्रन्थ का प्रथमसूत्र है -

**"अथातो भक्तिजिज्ञासा" ॥ १ ॥**

अथ अतः भक्तिजिज्ञासा ये तीन पद हैं । स्वरूपतः मङ्गलवाचक तथा अर्थतःआरम्भवाचक 'अथ' शब्द है । 'अतः' शब्द इदम् का का तसिल्-प्रत्यायान्त पचम्यन्तार्थक अव्यय है । यह 'इदम्' बुधिस्थ का परामर्शक है । भक्ति पुरुषार्थसाधन का परामर्शक है i जिज्ञासा शब्द निरूपण अथ में लाक्षणिक है । इस तरह **सूत्रार्थ होता** है - आत्यन्तिक-पुरुषार्थ 'मुक्ति' का उपाय माने जाने के कारण भक्ति का निरूपण प्रारम्भ किया जा रहा है ।

**विमर्श- अतः** (इदम्) पद बुधिस्थ कर्मकाण्डफल स्वर्गादि नाशशील है, तथा ब्रह्मविद्या का फल भी मोक्ष है,किन्तु उसका ज्ञान सब केलिए कठिन है ,इन अर्थों का परामर्श कराता हुआ ज्ञानी,अज्ञानी,पापी,पुण्यात्मा सब केलिए सदा सुलभ भक्ति मुक्ति का साधन है, यह अर्थ देता है । 'भक्तिजिज्ञासा' में जिज्ञासा-शब्द के कथन से भक्ति की पुरुषार्थता सिद्ध होती है । अतः 'भक्तिमीमांसा' का प्रयोग नहीं हुआ है । इस सूत्र में अनुबन्ध-चतुष्टय का निदर्शन भी है । 'विषयश्चाधिकारी च संबन्धश्च प्रयोजनम्' ये अनुबन्ध-चतुष्टय हैं । इस भक्तिसूत्र शास्त्र का विषय है- 'भक्ति' । भक्ति का प्रयोजन है - 'कैवल्य की प्राप्ति' । अधिकारी है - 'भक्तिकाम-व्यक्ति' । **सम्बन्ध है** - शास्त्र और कैवल्य में प्रयोज्य-प्रयोजक-

भाव, तथा भक्ति एवं कैवल्य में साध्य-साधनभाव । भक्ति शब्द 'भज् सेवायाम्' धातु से निष्पन है, किन्तु सेवामात्र इस धातु का अर्थ नहीं है । भक्ति है-भजन, परमेश्वर में मन को लगाना, भाव-विशेष रखना । भक्ति सेवामात्र नहीं है,यह बहुविध है ।कहा गया है कि - **भक्तियोगो बहुविधो मार्गैर्भामिनि भाव्यते ।स्वभावगुणमार्गेण पुंसां भावो हि भिद्यते ॥** इत्यादि शास्त्र वचनानुसार यह भाव-विशेष है । इसकी पुष्टि **द्यितीयसूत्र** से की जा रही है-

**"सा परानुरक्तिरीश्वरे" ॥ २ ॥**

सूत्र में 'सा' पद लक्ष्य भक्ति का निर्देशक है । 'परा' पद अनुरक्ति का विशेषण है । 'ईश्वरे' में सप्तमी का अर्थ विषय है । 'परानुरक्तिः'लक्षण है ।**सूत्रार्थ-** वह भक्ति जगत् का आराध्य ईश्वर के विषय में परम अनुरक्ति है ।

**विमर्श**- सूत्र में परा पद आराध्य ईश्वर-विषयक मुख्य रागवत्ता का निर्देश करता है, और गौण रागवत्ता की व्यावृत्ति भी करता है ।'अनु' पद 'ईश्वर महिमा-आदि के ज्ञान के पश्चात्' इस अर्थ को देता है । इस तरह सूत्र का **निष्कृष्टार्थ होता है**–ईश्वर के गुण महिमा आदि के श्रवण के अनन्तर ईश्वर के विषय में परम अनुरक्ति भक्ति है । इसकी तुलना विष्णु पुराणोक्त पद्य ( १.२०.१७ ) से की जा सकती है -

**"या प्रीतिरविवेकाकानां विषयेष्वनपायिनी । त्वामनुस्मरतःसा मे हृदयान्माऽपसर्पतु**" ॥ जिस प्रकार सुख साधन के विषयों में अविवेकी पुरुषों की अनपायिनी प्रीति होती है, वही अनपायिनी प्रीति ईश्वर का अनुस्मरन करते हुए मेरे हृदय से न हटे । आशय है कि - सांसारिक प्रपञ्चों से चित्त की वृत्तियां दूर होकर जब निष्काम भाव से प्रवाहित होती हुई ऐकान्तिक रूप से ईश्वर में स्थिर हो जाये तब वह परानुरक्ति बनती है । यह परानुरक्ति भक्ति है ।

शङ्का होती है कि अनेक विरोधी विषय वाला आत्मीय ज्ञान ही स्वकीय अविद्याओं का उन्मूलन करने में सक्षम हो सकता है, रक्ति=राग ऐसा नहीं होता है, अतः परानुरक्ति भक्ति निष्फल है,इसे क्यों स्वीकार किया जाये? इसका समाधान तृतीयसूत्र द्वारा करते हैं-

**"तत्संस्थस्यामृतत्वोपदेशात्" ॥ ३ ॥**

सूत्र में तत् पद ईश्वर का ग्राहक सर्वनाम है । तस्मिन् संस्था=निष्ठा यस्य सः तत्संस्थः= ईश्वर में निष्ठा रखने वाला । अमृतत्वस्य उपदेशः अमृतत्वोपदेशः=अमरता का उपदेश ।

तत्संस्थस्य अमृतत्वोपदेशात्=ईश्वरनिष्ठस्य अमृतत्वं श्रुत्यादिषु उपदिष्टं तस्मात्, ईश्वरे परानुरक्तिः भक्ति निष्फला नास्ति ।

**सूत्रार्थ-** ईश्वर में निष्ठा रखने वालों के लिए श्रुत्यादि में अमृतता का उपदेश किया गया है,अतः ईश्वर में परानुरक्ति निष्फल नहीं है ।

**विमर्श-** उपर्युक्त सूत्र में उक्त अमृतत्वोपदेश की पुष्टि छान्दोग्योपनिषद् में भी है 'अमृतत्वं फलम् उपदिश्यते' । 'ब्रह्मसंस्थोऽमृतत्वमेति' इत्यादि । इन सबकी पुष्टि पातञ्जल योगसूत्र से भी होती है । यथा 'ईश्वरप्रणिधानाद्वा', 'तस्य वाचकः प्रणवः',तज्जपस्तदर्थभावनम्' । तृतीय सूत्र से शाण्डिल्य कहना चाहते हैं कि- मुक्ति के तीन मार्ग ज्ञान कर्म और भक्ति हैं, किन्तु ज्ञान और कर्म मार्ग की तुलना में भक्ति का मार्ग सुलभ एवं सरल है । इसके लिए यावज्जीवं शास्त्राध्ययन नहीं करना पडता है, न ही नाना प्रकार के यज्ञ करने पडते हैं ,न ही कोई कठिन तपस्या करनी पडती है । स्वार्थमुक्त हो कर ईश्वरभक्ति भी मुक्ति देती है । इसमें शास्त्रवचन भी प्रमाण हैं ।

**चतुर्थ** सूत्र का प्रसङ्ग- तृतीयसूत्रस्थ 'तत्संस्थ' को श्रुति द्वारा 'ब्रह्मसंस्थ' कहा गया है । इस तरह ब्रह्मज्ञान ही ब्रह्मसंस्थ होता है । अमृतत्व की प्राप्ति उसी ज्ञान का फल है, भक्ति का फल नहीं है, इस प्रश्न का समाधान चतुर्थसूत्र द्वारा किया जा रहा है-

**"ज्ञानमिति चेन्न द्विषतोऽपि ज्ञानस्य तदसंस्थितेः" ॥ ४ ॥**

**ब्रह्म**संस्था ज्ञानमिति चेत्, न=ब्रह्म में निष्ठा ज्ञानभक्ति है, यह कहना उचित नहीं है । कुतः? इस जिज्ञासा का समाधान- द्विषतोऽपि तदसंस्थितेः=द्वेषी पुरुष भगवत्-माहात्म्य से परिचित होता है,उसे भी उसका ज्ञान रहता है,किन्तु 'तदसंस्थितेः'=तस्मिन् ईश्वरे असंस्थितिः=अनिष्ठा,तस्मात्=ईश्वर में निष्ठा भक्ति न होने से उसे अमृतत्व प्राप्त नहीं होता है ।

**सूत्रार्थ-** ब्रह्मज्ञान ही भक्ति है,वही अमृतत्व रूप फल देता है,भक्ति ब्रह्मनिष्ठा नहीं है, यह कथन समीचीन नहीं है । क्योंकि द्वेषी पुरुष को ब्रह्मसंबन्धी,ईश्वरसंबधी ज्ञान रहता है और वह ईश्वर के माहात्म्य सर्वशक्तिमत्ता आदि का भी ज्ञान भी रखता है, किन्तु उस ब्रह्मरूप में उसकी संस्था=निष्ठा,भक्ति नहीं रहने के कारण उसे अमरतारूप फल प्राप्त नहीं होता है ।

**विमर्श**- ईश्वर की परानुरक्तिरूपा भक्ति ही अमरता देती है यह भक्ति कई प्रकार की है । यथा राजभक्ति,राष्ट्रभक्ति,धनधान्यादिभक्ति,सांसारिक पदार्थों में भक्ति, किन्तु ये भक्तियाँ परमानन्द नहीं दे सकती हैं । क्यों कि ये अस्थायी एवं नाशवान् हैं । ईश्वरविषया परा अनुरक्ति ही परमानन्द देती हैं ।भक्ति का ज्ञान या ब्रह्मज्ञान मात्र होने से अमरता नहीं मिलती है । बादरायण-सूत्र "तन्निष्ठस्य मोक्षोपदेशात्" से इस की पुष्टि होती है ।

**प्रसंग-** ज्ञान भक्ति नहीं हो सकता न ही भक्ति ज्ञान हो सकती है । ज्ञान तो भक्ति का साधन मात्र है, वह मोक्ष के प्रति अन्यथासिद्ध है । इस विषय के प्रतिपादन केलिए पञ्चम सूत्र उपस्थित किया जाता है-

**"तयोपक्षयाच्च" ॥ ५ ॥**

तया उपक्षयात् च ये तीन पद सूत्र में हैं । तया पद भक्त्या को बता रहा है । उस भक्ति से, उपक्षयात् च= और उस भक्ति से ज्ञान का उपक्षय दृष्ट होने से ज्ञान भक्ति नहीं है । **विमर्श**- भक्ति के प्रति ज्ञान हेतुमात्र है, वह भक्ति के प्रति अन्यथासिद्ध है । इस बात को "यं सर्वे देवा नमन्ति मुमुक्षवो ब्रह्मवादिननश्च" इत्यादि श्रुतियाँ सिद्ध करती हैं । गीता का वचन- "पुरुषः सः परः पार्थ भक्त्या लभ्यस्त्वनन्यया" से सिद्ध है कि ब्रह्मप्राप्ति, ईश्वर प्राप्ति,सच्चिदानन्दप्राप्ति-रूप मोक्ष भक्तिमात्र से प्राप्त होता है । इस सूत्र का 'च' इन्हीं अर्थों का समुच्चय करता है ।

**सूत्र का निष्कृष्टार्थ**- भक्ति के द्वारा ईश्वरसायुज्य होने पर ईश्वरविषयक ज्ञान का उपक्षय हो जाने के कारण से ज्ञान भक्ति नहीं है । कारण यह है कि भक्त स्वयं को विस्मृत कर ईश्वरसायुज्य जब प्राप्त करता है तब विषयी, विषय, एवं कर्म एक हो जाता है ।

**प्रसङ्ग**- भक्ति को राग क्यों कहा गया है ? इसका समाधान षष्ठ सूत्र द्वारा बताते हैं-

**"द्वेषप्रतिपक्षभावाद् रसशब्दाच्च रागः" ॥ ६ ॥**

द्वेषप्रतिपक्षभावात्= द्वेषविरोधी होने से, च=और,रसशब्दात्=रस शब्द से, भक्ति को राग कहा गया है । आशय यह है कि लोक में 'अयं द्वेष्टा, अयं भक्तः' यह व्यवहार परस्पर विरुद्धधर्मियों में प्रयुक्त होता है । इस से प्रतीति होती है कि द्वेष के प्रतिकूल भाव के कारण भक्ति राग-रूपा है ं जिस प्रकार सुख का विरोधी दुख, ज्ञान का विरोधी अज्ञान है, उसी प्रकार राग का विरोधी द्वेष है । द्वेष का विरोधी भाव वाला होने से राग या अनुराग भक्ति है । रसशब्दाच्च रागः -आलङ्कारिकों ने 'रस्यते इति रसः' कहा है ।और विभानुभाव-

संचारिसंयोग से यह अभिव्यक्त होता है, यह जब कहते हैं तब विभावादि से अभिव्यक्त रस रागरूप होता है। "मुहुरहो रसिका भुवि भावुकाः" में इस शब्द से भक्ति तथा रसिक से भक्त का ही बोध होता देखा है। अतः रसशब्दार्थ के कारण भक्ति को राग कहते हैं। **विमर्श**- नानाविध रागों में भक्ति ही सूत्र में राग से परिलक्षित होती है। वह ईश्वरविषयक परानुरक्ति जब बनता है तब भक्तिशब्द से अभिहित होता है।स्कन्दपुराण में कहा है कि-

बीभत्सिते दुर्विषये कदाचिद्यो वाऽपि रागो भविता जनस्य।

स चेद्भविष्यत्यपिनाम रुद्रे को नाम न मुक्तो न भवेद्भवाब्धेः॥

इस पद्य में राग शब्द से स्पष्ट रूप में भक्ति अभिहित है। तैत्तिरीयोपनिषद् में भी 'रसं ह्येवायं लब्ध्वाऽऽनन्दीभवति' वचन द्वारा अनुराग को रस कहा गया है। **सूत्रसारार्थ-** द्वेष का प्रतिपक्षभाव होने से और रसशब्द के कारण राग भक्ति है।

**प्रसङ्ग-** पूर्वसूत्र में भक्ति और ज्ञान को एक नहीं माना गया है। किन्तु "तमेतं वेदानुवच-नेन ब्राह्मणा विविदिषन्ति" इत्यादि श्रुतिवाक्य ज्ञान को उद्दिष्ट करते हैं। किञ्च यज्ञादि पदों द्वारा विहित सामान्य कर्म को लक्षित कर व उसके ज्ञान को उद्दिष्ट कर यज्ञविधान की तरह भक्ति भी विहित होती है। इस तरह यज्ञादि के समान भक्ति भी ज्ञान की उपकारिणी कर्मरूपा ही है। दूसरी बात यह है कि-"तमेव विदित्वाऽतिमृत्युमेति नान्यःपन्था विद्यतेऽयनाय" इत्यादि श्रुतियाँ भी ज्ञान के माध्यम से ही अमरता की बात बताती हैं। अतः भक्ति और ज्ञान भिन्न कैसे हो सकते हैं? इसका समाधान सप्तम सूत्र द्वारा किया जा रहा है-

**"न क्रिया कृत्यनपेक्षणाज्ज्ञानवत्" ॥ ७ ॥**

न क्रिया=भक्ति क्रिया नहीं हो सकती है, कृत्यनपेक्षणात् =ईश्वर के गुणादि के ज्ञानमात्र से साध्य अनुरक्तिरूपा भक्ति पुरुषकृत्य की अपेक्षा नहीं रखती है। ज्ञानवत्=जिस प्रकार ज्ञान प्रमाणाधीन होता है,और वह व्यक्ति द्वारा स्वेच्छा से अन्यथा नहीं किया जा सकता, उसी प्रकार भक्ति भी है।यथा रागियों की कामिनीविषयक रति रागियों के व्यापार से नहीं होती, केवल कामबुद्धि आदि से होती है उसी प्रकार यः भक्ति भी है। यह भक्ति यज्ञादि के समान न तो क्रियारूपा है,न ही इच्छा या ज्ञानरूपा।

**भावार्थ-** कृत्य की अपेक्षा से रहित होने के कारण यह भक्ति ज्ञान के समान नहीं है । ज्ञान तो क्रियासापेक्ष है, किन्तु भक्ति क्रियासापेक्ष नहीं है । वस्तुतः ज्ञान एवं भक्ति की प्राप्ति के उपाय भिन्न भिन्न हैं ।

**प्रसङ्ग-** ज्ञान एवं क्रिया इन दोनों से भक्ति भिन्न है । ज्ञान और क्रिया का फल सीमित है, किन्तु भक्ति का फल असीमित है इस बात को ८ वें सूत्र में बताया जा रहा है-

**"अत एव च फलाऽऽनन्त्यम्" ॥ ८ ॥**

अत एव = भक्ति क्रियास्वरूपा या ज्ञानस्वरूपा नहीं है,इस कारण से, फलाऽऽनन्त्यम्= भक्ति के फल अनन्त एवं असंख्य हैं । शाण्डिल्यस्मृति में कहा गया है कि-

**मद्भक्तियोगेन मद्भक्तो लभतेऽञ्जसा । स्वर्गापवर्गं यद्धाम यत्किञ्चिदपि वाञ्छति ॥**

के हेतु भक्तिरूप अमृत का सेवन करना चाहिए । शास्त्रादिजन्य ज्ञान बहुविधा दुखों को देता **सूत्रार्थ-** भक्ति क्रियारूप या ज्ञानरूप नहीं है, अतः इसका अनन्त फल है  सूत्र का अन्य अर्थ यह भी हो सकता है कि भक्ति क्रियारूपा नहीं है, अत एव भक्ति से अनन्त निःश्रेयस एवं अक्षय निःश्रेयस प्राप्त होता है ।

श्रुति का वचन है- "यत् भूमा तत् सुखम्, नाल्पे सुखमस्ति" । चराचर में केवल ब्रह्म भूमा -व्यापक है,वह सुख है, अन्य सब अल्प हैं । अल्प में सुख नहीं है । हम सब के शरीर में विद्यमान असीम आत्मा सीमित से संतुष्ट नहीं हो सकता है । वह असीम असीम को पाकर ही सन्तुष्ट होगा । अतः सभी को सीमित पदार्थों का त्याग कर असीम की प्राप्ति है,परन्तु भक्ति अनन्त सुखमय ही है ।

**प्रसङ्ग-** भक्ति में मुक्ति है,ज्ञान में भी मुक्ति है ऐसा कहने वालों के प्रति नवम सूत्र द्वारा शाण्डिल्य बता रहे हैं कि यह अयुक्त है -

**"तद्वतःप्रपत्तिशब्दाच्च न ज्ञानमितरप्रपत्तिवत्" ॥ ९ ॥**

तद्वतः में तद् से ज्ञान का ग्रहण है । तद्वतः=ज्ञानवान् को प्रपत्तिशब्दात्=प्रपन्नशब्द से कहा गया है, अतः 'इतरप्रपत्तिवत्'= अन्यप्रपत्ति के समान,ज्ञानम्=ज्ञान,न= नहीं है, अर्थात् ज्ञान भक्ति नहीं है ।

**सूत्रार्थ-** ज्ञानवान् को प्रपत्ति शब्द से कहा गया हा है, किन्तु ज्ञान अन्यप्रपत्ति (भक्ति) के समान नही है ।

सूत्रशब्दार्थ स्वयं में स्प्ष्टार्थबोधक नहीं है । अतः इसकी व्याख्या से पूर्व यह जानना चाहिए कि गीता में भगवान् श्रीकृष्ण ने कहा है कि -

बहूनां जन्मनामन्ते ज्ञानवान् मां प्रपद्यते । स सर्वविद् भजति मां सर्वभावेन भारत ॥ ज्ञानवान् को यहाँ ईश्वर-प्राप्ति (प्रपत्ति) होती है ऐसा कहा गया है । इस प्रपत्ति में ज्ञान मुख्य है,भक्ति नहीं । इससे असहमत शाण्डिल्य कहते हैं कि- "स सर्वविद् भजति माम्" द्वारा यह भी कहा गया है कि 'वह ज्ञानी-पुरुष मुझे भजता है' । भजन भक्ति से मुझे पाता है, यह अर्थ करना चाहिए । ज्ञानवान्

को भक्ति-रूप प्रपत्ति होती है । अतः भक्ति मुख्य है । भक्ति ईश्वर-प्राप्ति का अव्यवहित साधन है,ज्ञान व्यवहित साधन है । अतः

सूत्र में इतरप्रपत्तिवत् ज्ञानम्, कहा है । इतरप्रपत्ति के समान ज्ञान भक्ति नहीं है, अपि तु ज्ञान से भक्ति हो सकती है, मुक्ति नहीं ।

(प्रो. अर्कनाथ चौधरी )

# नारदीयसूत्रे भक्तिवैशिष्ट्यम्

मोक्षः भारतीयचिन्तनस्य परमप्रयोजनमस्ति। मुमुक्षवः जनाः तापत्रयात् विमुक्तये त्रीणि साधनानि प्रयुंज्यन्ति– ज्ञानं, कर्म, भक्तिश्च। तेषु त्रिषु भक्त्याः परमा प्रसिद्धिरस्ति सहजत्वात्। यतोहि ज्ञानकर्मणी साधनयोग्यते च अपेक्षेते परन्तु भक्तिमार्गे कोऽपि प्रतिबन्धो नास्ति। अतः मोक्षमार्गस्यायं भक्तिमार्गः सरलः सुगमः,सहजश्च मार्ग उच्यते।

उपनिषच्छास्त्राणि ज्ञानकमर्णः प्रतिपादकानि सन्ति तत्र भक्तिमार्गस्य प्रतिपादनं स्फुटरूपेण न प्राप्यते अथवा ज्ञानप्रतिपादने भक्तिः पराभूता

इव दृश्यते । वस्तुतः पुराणशास्त्रेषु विशेषतः भागवतपुराणे अथवा संस्कृतेतरेषु आलावरमीरांकबीरसूरदासादीनां लौकिककाव्येषु भक्तिमार्गस्य प्रधानता दृश्यते। ज्ञानकर्मणः विषयाः दुरूहास्सन्ति तस्मात् अनुजैनबौद्धावतारं सामान्यजनानां रुचिः भगवतः चरित्रमवलम्ब्य कथासंकीर्तनाद्, गाानाद्, नृत्याद् वा मोक्षमार्गे उन्मुखा अस्ति इति विलोक्य भक्त्युपरि सूत्रशैल्या साहित्यस्य रचनायाः महत्त्वं विचार्य भक्तिसूत्राणि रचितानि । तेषु नारदभक्तिसूत्रं शाण्डिल्यभक्तिसूत्रं च महत्वपूर्णमस्ति। भक्तिमार्गे कोऽपि पात्रता आवश्यकी नास्ति तत्र तु अनन्यश्रद्धा आवश्यकी वर्तते यः अनन्यभावेन भगवन्तं कृष्णं केनापि साधनेन कथमपि भजति, प्रीतिं करोति वा सेवां करोति, नैवेद्यं निवेदयति,पाययति, स्नापयति, खादयति, स्वापयति, गीतं श्रावयति, चरित्रं कथयति तत् सर्वं भक्तिरिति उच्यते[1]

अत्र जिज्ञासा जाता केयं भक्तिः। अमरकोशकार उच्यते– श्रद्धारचनयोर्भक्तिर्गौण्यां वृत्तौ च सेवने ।[2] भजधातोः क्तिन्प्रत्ययेन निष्पन्नं पदमिदम् । भजधातुः प्रीतिसेवयोः अर्थयोः भवति। शाण्डिल्यसूत्रेऽपि भक्तिविषये प्राप्यते–अथातों भक्तिजिज्ञासा सा परानुरक्तिरीश्वरे इति।[3] । उपासना अर्थात् परमेश्वरविषये परमप्रेम । नारदीयभक्तिसूत्रे भक्त्याः लक्षणरूपे प्राप्यते– सा त्वस्मिन्न परमप्रेमरूपा।[4] अमृतस्वरूपा च ।[5] यल्लब्ध्वा पुमान् सिद्धो भवति अमृतो भवति तृप्तो भवति।[6] यद् प्राप्य न किंचिद् वांछति न शोचति न रमते न द्वेष्टि न रमते नोत्साही भवति।[7] अर्थात् भक्त्यां हरिप्रेम विहाय कस्यापि कामना न विद्यते अशुभभावोऽपि न विद्यते ।

भक्तिः वस्तुतः निष्कामकर्मणः विग्रहवत् स्वरूपमस्ति। फलस्याकांक्षाहीनं कर्म निष्कामकर्म उच्यते । जगति दृश्यते यत् जनाः कर्मफलं विचिन्त्य कर्माणि कुर्वन्ति। कर्मफलस्य आकांक्षा रागद्वेषादीनां भावानां जनयित्री तया भावनया जनाः आत्मकामत्वं विहाय सांसारिककुचक्रे पतति। अनेकवारं भवसागरे निमज्जन्ति अतः भगवान् श्रीकृष्णः कामनाविहीनं कर्म उपदिशति– कर्मण्येव वाधिकारस्ते मा फलेषु कदाचन।[8] किंच ईशोपनिषदि अपि प्राप्यते– कुर्वन्नेवेह कर्माणि जीजिविषेच्छतं समाः।[9] ज्ञानेन निष्कामकर्मणा वा जनाः भवसागरात् विमुंचन्ति परन्तु ज्ञानमार्गः अरण्यनिवासिनेभ्यः सार्थकः भवति। कर्ममार्गेण गृहस्थजनाः वितरन्ति। भक्तिमार्गस्तु अरण्येऽपि फलति तद्वद् गृहेऽपि। कर्ममार्गो वा अथवा ज्ञानमार्गः अनयोः द्वयोः मार्गयोः परिणति ईश्वरे अनन्यश्रद्धारूपे परिणमति परन्तु भक्तिमार्गे प्रथमरूपतया श्रद्धा एव जायते अतः श्रीमद्भगवद्गीतायां श्रीकृष्णेनापि निगदितं यत्–

योगिनामपि सर्वेषां मद्गतेनान्तरात्मा। श्रद्धावान्भजते यो मां स मे युक्ततमो मतः।।[10]

अत्रापि भगवता वासुदेवेन मुखरविन्दादपि भक्तः प्रशंसितः। नारदोऽपि वचति- यद् सा न कामयमाना निरोधरूपात् निरोधः एवं सूत्रितः- निरोधस्तु लोकवेदव्यापारन्यासः।[11] अर्थात् भक्तिमार्गे वैदिककर्मण अपि त्यागः भवति तदा भक्तः किं करोति अथवा कीदृशं कर्म करोति समाधत्ते- लोके वेदेषु तदनुकूलाचरणं तद्विरोधिषूदासीनता।[12]। अस्मिन् विषये भगवद्गीतायां स्पष्टरूपेणोक्तम्-

सततं कीर्तयन्तो मां यतन्तश्च दृढव्रताः। नमस्यन्तश्च मां भक्त्या नित्ययुक्ता उपासते।।[13]

प्रीतिर्सेवा वा नैर्वैषयकी ना भवति तत्र कस्यापि तत्त्वस्य ग्रहणमावश्यकमस्ति कालान्तरे कामम् आधाराधेयविषयकः भेदः मा भवेद् परन्तु प्रथमचरणे आधार आवश्यकः मन्यते। भक्तया भक्तः भगवन्मयः भवति तदा भक्त्या वशीभूतः भगवान् भक्तस्यानुकारी अपि भवति। भक्तिर्वैशिष्ट्येयम् यत् ज्ञानकर्ममार्गे मुमुक्षुः मोक्षपदमनुसरति परन्तु अत्र मोक्षस्वरूपः निर्गुणब्रह्म स्वयमेव साकारं भूत्वा भक्तान् लीलामृतं पाययति। तस्य पानं तु अनिर्वचनीयमस्ति। भगवति तत्परे भक्तस्य निजता नश्यति तत्र भक्तः भगवान् वा भेदोऽयं दुग्राह्यो भवति। भक्तस्य प्रतिपलं भगवते भवति अतः तत्र कर्मफलं मोक्षस्यापि कामना पलायते केवलं तत्र भगवतः प्रियं कथं स्यात्, तादृशी भावना वर्तते। यथा शरीरे श्वसनं, रक्तपरिसंचरणं स्वतः भवति तथैव भक्तस्य प्रत्येकं कर्म स्वतः भगवदार्थम् भवति। कदाचिद् ज्ञानकर्मणि वा अहंकारमपि जायेत् परन्तु भक्तिः अहंकारशून्या भवति अतः भगवान् भक्तं न पातयति।

अत्र नारदः दृष्टान्तरूपेण गोपांगनानां निर्दिशति तत्र वयं जानीमः यत् गोपागंनानां काऽपि निजता नास्ति ताः दुग्धदोहनं, जलानयनं,गृहमार्जनं, दुग्धवितरणं इत्यादीनि नाना कर्माणि कुर्वन्ति परन्तु तत्र कृष्णवैषयिकी प्रीतिः लुप्ता न भवति तत् सर्वं कृष्णाय एव आसीत् । एवमेव तासां गोपांगनानां प्रीति ,उपालम्भाः, रागः, द्वेषः एतेषां भावानामाधारोऽपि श्रीकृष्णोऽस्ति। अतः भक्तिः ज्ञानकर्मणः गरीयसी उच्यते। किंच तत्र जगतः शून्यता अपि ज्ञायते सर्वं कृष्णायते। एतादृशी भावना ज्ञानकर्मणः परमसारः उच्यते निष्कामकर्मण अपि अतः नारदीयभक्तिसूत्रे ज्ञानं भक्त्याः साधनरूपे उक्तं।[14] श्रीमद्भगवद्गीता श्रीकृष्ण उच्यते- सर्वधर्मान् परित्यज्य मामेकं शरण व्रजं।[15] नारदोऽपि सूत्रयति- तदर्पिताखिलाचारता तद्विस्मरणे परमव्याकुलतेति।[16] तदा भक्तस्य यादृशी स्थितिर्जायते तादृशी स्थितिः ज्ञानिनः कर्मयोगिनः वा भवति- गुणरहितं कामनारहितं प्रतिक्षणवर्धमानमविच्छिन्नं सूक्ष्मतरमनुभवरूपम्।[17] भक्तः कृष्णात् परः किमपि तत्त्वं न जानाति ततः परः प्रीयमाणः भगवानपि भक्त्या भक्तान् स्वरूपं दर्शयति-

भक्त्या त्वनन्यया शक्यअहमेवंविधोऽर्जुन। ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परन्तपः।।[18]

स्पष्टमिदं यत् ज्ञानकर्माभ्यां भक्तिरेव गरीयसी। यतोहि भगवान् भक्तवत्सलः। यो अनन्यभक्त्या भगवन्तं भजति भगवानपि तमेव चिन्तयति किंच यः वैरभावेनापि भगवन्तं चिन्तयति भगवान् तमपि मोक्षं प्रददाति। किंच भक्तिः ज्ञानस्य फलरूपा अतः अनया दृष्टयाऽपि भक्तिः श्रेष्ठतरा अतः नारदः सिद्धान्तरूपेण कथयति–त्रिसत्यस्य भक्तिरेव गरीयसी भक्तिरेव गरीयसी[19]

सन्दर्भः

1नारदीयसूत्रम्– पूजादिष्वनुराग इति पाराशर्यः16, कथादिष्विति गर्ग17, आत्मरत्यविरोधेनेति18

2अमरकोश3/3/85,पृ.569,चतुर्थसंस्करण, चौखम्भा पब्लिकेशन, नई दिल्ली।

3शाण्डिल्यभक्तिसूत्रम्– सूत्र1, 2

4 नारदीयभक्तिसूत्रम्– 2

5 नारदीयभक्तिसूत्रम्– 3

6 वही– 4

7 वही–5

8 श्रीमद्भगवद्गीता

9 ईशावास्योपनिषद्–2

10 श्रीमद्भगवद्गीता–6/46

11 नारदीयभक्तिसूत्र– 7

12 नारदीयभक्तिसूत्र– 11

13 श्रीमद्भगवद्गीता–6/47

14 तस्या ज्ञानमेव साधनमित्येके, नारदीयभक्तिसूत्र– 28

15 श्रीमद्भगवद्गीता

16 नारदीयभक्तिसूत्र– 19

17 नारदीयभक्तिसूत्र– 54

18 श्रीमद्भगवद्गीता–11/54

19 नारदीयभक्तिसूत्र– 81

प्रो.अर्कनाथ चौधरी

## नारदभक्तिसूत्रव्याख्यानम् (सूत्रसंख्या १- १२ )

भगवतो ब्रह्मण आज्ञया महर्षिः नारदः लोकेषु हरिविषयकभक्तिं द्रढयितुं भक्तिदर्शनस्य रचनां कृतवान् यच्चाधुना नरादभक्तिसूत्रमिति नाम्ना ज्ञायते । नारदभक्तिसूत्रं भक्तिमार्गस्य महत्त्वपूर्णो ग्रन्थः,यत्र चतुरशीतिसंख्याकैः सूत्रैः (८४ )भक्तेः स्वरूपं,विधिः,विकासः, लक्षणानि च प्रस्तुतानि । अस्य प्रथमं सूत्रं द्वितीयस्य भूमिकां निर्मातीति विशेषः। भक्त्यैव रसस्व रूपस्य भगवतो दर्शनेन ऋषयो मुनयश्च परमानन्दमनुभूतवन्तः । सैव भक्तिः सर्वजनतारि णीति कृत्वा प्रथमं भक्तिविषयकं प्रस्तूयते-

**अथातो भक्तिं व्याख्यास्यामः ॥ १ ॥**

अथ अतः भक्तिं व्याख्यास्यामः इति चतुष्पदात्मकं सूत्रम् । अथशब्द: मङ्गलवाची, आरम्भ वाची आनन्तर्यवाची च । मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि च शात्राणि प्रथन्ते अध्येतारश्च वृद्धियुक्ता आयुष्मन्तो भवन्तीति शास्त्रवचः । 'पाठकस्य मङ्गलं भूयात्' इत्य भिप्रायेण अथ मङ्गलार्थकः । किञ्चानेन अस्य ग्रन्थस्यारम्भोऽपि सूच्यते । बहूनां विद्याना मुपदेशादनन्तरं प्रेमभक्तिप्रधानस्य अस्य निरूपणं क्रियते इति तृत्तीयार्थः अपि सङ्गच्छते । अतः इति प्रयोजनवाची,कारणवाची चास्ति । लोके जीवाः नानाविधक्लेशपीडिताः सन्तीति कारणात्, तेषां क्लेशविनाशाय सत्यस्वरूपस्य परमानन्दमयस्य परमेश्वरस्य प्राप्तिप्रयोजना च्च, इत्यर्थ आयाति 'अतः' शब्दस्य । भक्तिं भक्तिप्रतिपादकं शास्त्रं, व्याख्यास्यामः निरूप यिष्यामः, इति सूत्रस्थपदानामर्थः ।

**सूत्रार्थः**- बहूनानां शस्त्राणां निरूपणात्परं पाठकानाञ्च मङ्गलार्थं, जीवाः संसारदुखबन्धनात् भक्तिमार्गेण परमेश्वरं ज्ञात्वा मुक्ताः भवेयुरिति प्रयोजनाच्च भक्तिसूत्राणां व्याख्यानं कुर्मः।
**विमर्शः**- भज् धातोः निष्पन्नस्य भक्तिशब्दस्य अर्थः- भजनं, भागः, भञ्जनञ्च भवति । भगवतःलीलायाः,गुणानां,रूपादीनाञ्च दर्शनं,कथनं,साक्षात्कारः,भजनं रसनं रसास्वाद एवापूर्वः। भागो भक्तिर्नाम भजनेन ईश्वरस्यांशीभावः । भञ्जनम् भक्तिरिति रागद्वेषमोहादीनां नाशः।

**प्रसङ्गः-** यस्याः भक्तेःस्वीकारेण जीवः संसारदुखबन्धनान्मुक्तो भूत्वा परमानन्दं प्राप्नोति सा भक्तिः किंस्वरूपा ? इति जिज्ञासायामुच्यते द्वितीयं सूत्रम् -

**सा त्वस्मिन् परमप्रेमरूपा ॥ २ ॥**

सा तु अस्मिन् परमप्रेमरूपा इति सूत्रे 'सा' इति तत्पदेन पूर्वसूत्रे उक्तायाःभक्तेः परामर्शो भवति । सा भक्तिरित्यर्थः । तु इति समुच्चयार्थकः । अस्मिन्= परमेश्वरे,परमात्मनि,

परमप्रेमरूपा= परमः च तद् प्रेम परमप्रेम, परमप्रेम रूपं स्वरूपं,यस्याः सा भक्तिः । **सूत्रार्थः-** परमानन्दरूपे परमेश्वरे जीवात्मनः अनन्यं प्रेम भक्तिरस्ति ।

**विमर्शः-**भक्तेःनानाप्रकाराःभवन्ति,यथा गुरुभक्तिः,मातृभक्तिः,पितृभक्तिः,राजभक्तिः,बन्धु-बान्धवभक्तिः, तेषु सर्वेषु भक्तिप्रकारेषु परमात्मनि यद् अनन्यं प्रेम वर्तते सा सर्वोत्तमा भक्तिरस्ति । महर्षिः शाण्डिल्योऽपि भक्तिस्वरूपं प्रतिपादयन् वक्ति-"सा परानुरक्तिरीश्वरे" इति । (शा.भ.सू.२) अयमाशयो वर्तते यत् अन्यानि सर्वविधानि प्रेमाणि क्षीयमाणानि सन्ति,किन्तु परमेश्वरं प्रति सदा प्रवहमानं पेम अक्षुण्णं भवति । सामान्यं प्रेम अपेक्षां दर्शयति ,किन्तु ईश्वरे प्रेम यदा अपेक्षां नापेक्षते तदा तत् परमप्रेमरूपं भवति ¡ एष्वराकारा एव चित्तवृत्तिरुदेति तदा ¡

**प्रसङ्गः**- द्वितीयसूत्रे परमप्रेमरूपा भक्तिः उक्ता, सा खलु भक्तिरूपार्थस्य बाह्यं स्वरूपम् । भक्तिपदर्थस्य अन्तःस्वरूपंमधुना तृतीये सूत्रे निरूप्यते-

**अमृतस्वरूपा च ॥३ ॥**

च अथ इयं भक्तिः अमृतस्वरूपा= अमृतं स्वरूपं यस्याः तथाविधा वर्तते ¡ प्रेमरूपा या भक्तिः सा सर्वजनगम्या भवति,किन्तु अस्याः भक्तेः अमृतस्वरूपत्वं यदस्ति तद अत्मगम्यममेव भवति । अमृतस्वरूपा भक्तिः वस्तुतः भगवद्रूपैव भवति,यत्र भक्तेश्वरयोः अविनाभावसंबन्धो जायते ।

**विमर्शः-** भक्तसाधको यदा अन्तःरूपेण ईश्वरेण संबद्धो भवति तदा सः अमरतामाप्नोति । ऋषिः शाण्डिल्योऽपि स्वकीये भक्तिसूत्रे वदति- "तत्संस्थस्य अमृतत्वोपदेशात् " इति ¡ छान्दोग्योपनिषदि (२-३-२) "ब्रह्मसंस्थोऽमृतत्वमेति" इत्युक्तम् । एभिरपि प्रमाणैः सिद्धं भवति यत् परमेश्वरे परमं प्रेम भक्तिरूपं अमरतां ददाति,अतः भक्तिः अमृत्स्वरूपा अस्ति । एतदपि ध्येयं भवति यत् कर्मरूपो धर्मः फलं दत्त्वा क्षीणो जायते,किन्तु भक्तिःअमरा सदा विद्यमाना ।

**प्रसङ्गः-** भक्त्या किं किं दृश्यते भक्तेषु येन अयं भक्तः इति ज्ञानं भवेद, तद्विषये चतुर्थे सूत्रे उच्यते-

**यल्लब्ध्वा पुमान् सिद्धो भवति अमृतो भवति तृप्तो भवति ॥ ४ ॥**

यत् परमप्रेमरूपाम् अमृतरूपाञ्च भक्तिं, लब्ध्वा =प्राप्य ,पुमान्-भक्तः पुरुषः,सिद्धो भवति=जायते,अमृतः=अमृतस्वरूपः, भवति,तृप्तो भवति= प्रीणाति च । **सूत्रार्थः-** परमप्रेमरूपां भक्तिम् अमृतस्वरूपाञ्च भक्तिम्संप्राप्य जीवः सिद्धो जायते,अमरो भवति,तृप्यति च । **विमर्शः**-अमृतस्वरूपया परमप्रेमरूपया च भक्त्या पुमान् सिद्धो भवति,अर्थात्ऐश्वर्यं तस्मिन् दृश्यते । यद्यपि स ऐश्वर्याभिलाषी न भवति तथापि ईश्वरः तद् प्रयच्छति । न च तदर्थं स यतते । अमृतो भवतीत्यस्याशयो भवति जन्ममरणादिव्यापारात् मुक्तो भू त्वा तद्रूपतां धत्ते, तस्मिन्नेव लीयते वा । तृप्तो भवति इत्यस्यायमभिप्रायो विद्यते यत् सः जीवन्मुक्तिं लभते । जीवने ईप्सितवस्तूनां स्पृहाभावात् अत्यन्तं प्रीणाति । यद्यपि अस्यां दशायां बाह्यं सांसारिकामा च दुखं आप्लावयति तम्, किन्तु सः सर्वस्यां दशायां प्रीतःतृप्तश्चैव दृश्यते ।

**प्रसङ्गः-** प्रेमरूपां भक्तिं कृत्वा अमृतताञ्च अवाप्य भक्तः किं किं न कुरुते इत्येतद् पञ्चमे सूत्रे मुनिः नारदः संभाषते-

**यत्प्राप्य न किञ्चिद् वाञ्छति न शोचति न द्वेष्टि न रमते नोत्साही भवति ॥ ५ ॥**

यत्प्राप्य= यां परमप्रेमरूपाम् अमृतस्वरूपाञ्च भक्तिं लब्ध्वा नरः,न किञ्चिद् वाञ्छति=न च मानवःकिमपि सांसारिकं वस्तु इच्छति,न शोचति= न शोकं कुरुते, न द्वेष्टि=न कस्मैचित् द्वेषं धारयति,न रमते= न कुत्रचित् आसक्तो भवति, न उत्साही भवति= न च जागतिक-भोग्यपदार्थप्राप्तये उत्साहं करोति इति सूत्रार्थः ।

**विमर्शः**- यदा कश्चित् मनुष्यः भक्तिमार्गेण ईश्वरे रममाणः परमभक्तिफलं दिव्यमानन्दम् आप्नोति तदा न काचित् तदीया इच्छा अवशिष्टा भवति, न च घोरासु अपि परिस्थितिषु शोकं करोति ,न च कञ्चित् प्रति द्वेषभावं धरति,न वा लौकिकं पदार्थं प्राप्तुं चेष्टते । एतदेव भगवान् गीतायां भक्तियोगनामकेऽध्याये कथयति भक्तविषये- “ यो न हृष्यति न द्वेष्टि न शोचति न काङ्क्षति” इति । यः कदाचिदपि न हर्षितो भवति न द्वेषं करोति,न शोकं करोति, शुभाशुभत्यागी चास्ति स भक्तिमान् मम प्रियोऽस्ति ।

**प्रसङ्गः-** प्रेमभक्त्या अमृतस्वरूपभक्त्या च भक्तः सिद्धः, अमृतः,तृप्तः,द्वेषादिरहितो भवति इत्याद्युक्त्वा षष्ठे सूत्रेऽपि भक्तविषये एवोच्यते-

**यत् ज्ञात्वा मत्तो भवति स्तब्धो भवति आत्मारामो भवति ॥ ६ ॥**

यत् ज्ञात्वा=यां प्रेमरूपां भक्तिं प्राप्य (जनः) मत्तः=आनन्दपरिप्लुतः भवति, स्तब्धः=शान्तः भवति, आत्मारामः=आत्मनि एव आ समन्तात् रमते यः स आत्मारामः, तद्भावापन्नो भवतीति । **सूत्रार्थः**- प्रेमरूपां भक्तिं विज्ञाय भक्तः आनन्दपूर्णः शान्तः स्वस्मिन्नेव अन्तरात्मनि रमते च ।

**विमर्शः**- अस्मिन् सूत्रे प्रेमरूपभक्तेः प्राप्त्यनन्तरं भक्तस्वभावे त्रिविधं परिवर्तनं जायते इत्युक्तम् । प्रथमं तावत् सः **मत्तो भवतीत्यस्य** आशयो वर्तते यत् आश्रयविषयसहितस्य ईश्वरस्य ज्ञानं तं उन्मत्तं करोति,स सदा भगवन्तमेव ध्यायति । कदाचित् भगवतो मेलन मनुभूय हसति, कदाचित् भगवद्वियोगं ध्यात्वा रोदिति कदाचित् नृत्यति,उच्चैः लीलागानं करोति, इत्यादि सर्वं मत्तपदेनाभिहितम् । **स्तब्धो भवतीत्यस्याशयो** वर्तते- बाह्ययस्पर्शादीनाम् अनुभूतिरहितः,स्पन्दहीनस्थिरशरीरः,प्रस्रवत्प्रेमानन्दाश्रुःसन् परमेश्वरस्य प्रेममयस्वरूपे तल्लीनः,निश्चलः इति । **आत्मारामो भवति** इत्यस्याशयो वर्तते- आत्मानमेव परमात्मानं मत्वा तत्रैव रमते,तृप्यति,,विश्राम्यति च । सः स्वहृदये विषयेन्द्रियव्यापारं विना एव स्वाभाविकीं तृप्तिमनुभवति, अन्यसाधनापेक्षां विना निरन्तरं परमात्मरूपे आत्मनि विचरति ।

**प्रसङ्गः**- प्रेमरूपा भक्तिः पुनःकिंस्वरूपा ? इत्येतद्विषये सप्तमे सूत्रे नारदेनोच्यते-

**सा न कामयमाना निरोधरूपत्वात् ॥ ७ ॥**

सा प्रेमरूपा भक्तिः, न कामयमाना- न कामनामयी भवति, कुतः इति चेत् ? उच्यते- निरोधरूपत्वात् =निरोधःरूपं यस्याः,तस्या भावः,निरोधरूपत्वं, तस्मात् इति व्युत्पत्तिः। काम क्रोधलोभमोहादिभिःनिरुणद्धि इयं परमप्रेमरूपा भक्तिः इत्यर्थः । **सूत्रार्थः**-यस्य हृदये भक्तिः प्रविष्टा तस्य हृदयं न कामयते,अतः इयं न कामयमाना अस्ति । इयं संपूर्णात् आकर्षणात् भक्तं निरुणद्धि इति भक्तेः निरोधरूपता वर्तते ।

**विमर्शः-** परमप्रेमरूपा भक्तिः शुकेन "त्यक्तान्यभावस्य भजतः" इति शब्देनोदीरिता-

**स्वपादमूलं भजतःप्रियस्य त्यक्तान्यभावस्य हरिः परेशः ।**

**विकर्म यच्चोत्पतितं कथञ्चिद् धुनोति सर्वं हृदि संनिविष्टः॥**

एवंविधा भक्तिःदिव्यं प्रेमापि जनयति । भक्तस्य प्रेम्णि अनन्यता भवति ।तत्र इष्टस्य सुखं काम्यते,न स्वस्य सुखं इष्यते, अतः न कामयमाना स्वस्य सुखाय इयमस्ति । किञ्चेयं कामिनी नास्ति । कामःलौकिकसुखं प्रति आकर्षति,परन्तु भक्तिः परमात्मसमीपं नयति ।

भक्तो जनः सालोक्य-सार्ष्टि-सामीप्य-सारूप्य-सायुज्यरूपासु पञ्चसु मुक्तिषु कामनां कुरुते । परमप्रेमरूपया पराभक्त्या सामीप्यं सायुज्यं च कामनां विनैव लभ्यते । अष्टमे नवमे च सूत्रे निरोधो वर्णितः, अतः तत्रैव तद्विषये वक्ष्यते ।

**प्रसङ्गः**-सप्तमे सूत्रे निरोधरूपत्वात् इत्यत्र निरोधशब्दः प्रयुक्तः। कस्तावदत्र निरोध इति जिज्ञासायामुच्यते अष्टमे सूत्रे-

**निरोधस्तु लोकवेदव्यापारन्यासः ॥ ८ ॥**

सामान्यतः निरोधशब्दार्थःत्यागो भवति, किन्तु नारदस्य- लोकवेदयोः व्यापाराः कार्याणि आचरणानि वा लोकवेदव्यापारः,तेषां व्यपराणां, न्यासः=समर्पणम्, निरोधशब्दार्थोऽत्र अभि प्रेतोऽस्ति । अर्थात् समस्तकार्यजातानां भगवन्तं प्रति समर्पणमेव निरोधः । **सूत्रार्थः-** समस्त लौकिकवैदिककार्याणां परमेश्वरं प्रति समर्पणं निरोधो वर्तते ।

**विमर्शः-** सूत्रोक्तनिरोधशब्दार्थः न्यासः समर्पणं वा इत्यर्थस्य पुष्टिः भगवद्गीतायाः नवमा ध्यायस्य अनयोरपि श्लोकयोः दृश्यते-

**यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् ।यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम् ॥२७ ॥ शुभाशुभफलैरेवं मोक्ष्यसे कर्मबन्धनैः । संन्यासयोगयुक्तात्मा विमुक्तो मामुपैष्यसि ॥ २८ ॥** वस्तुतः न्यासः सर्वोत्तमं तपः ।भगवत एव सर्वं तस्मै समर्प्यते ।अत एवोच्यते 'त्वदीयं वस्तु गोविन्द तुभ्यमेव समर्पये' इति लोकव्यवहारः । नवग्रहादिपूजनं वैदिकविधिना क्रियमाणं यद् भवति तदपि ईश्वरसमर्पणबुद्ध्यैव करणीयम् । निरोधस्य परिपूर्त्तिः तदैव संभवेत् यदा सर्वाः शारीरिकमानसिकचेष्टाः ईश्वरार्थाः भवेयुः । अनन्यभक्तानां कृते इमे व्यापाराः नावश्यकाः । **प्रसंगः**- न केवलं लोकवेदव्यापारन्यास एव निरोधः अपि तु अनन्यत्वादिकमपि । नवमे सूत्रे निरोधस्य अन्यमर्थं प्रतिपादयति मुनिः नारदः-

**तस्मिन्ननन्यता तद्विरोधिषूदासीनता च ॥ ९ ॥**

तस्मिन् अनन्यता तद्विरोधिषु उदासीनता च इति पदच्छेदः । चकारः पूर्वसूत्रोक्तनिरोध पदस्य समुच्चायकः। तस्मिन्=ईश्वरे,अनन्यता=अनन्यभावः,तस्य विरोधी तद्विरोधी, तेषु, भगवतः विरोधिषु, उदासीनता=औदासीन्यं चापि निरोधो भवति । **सूत्रार्थः**- भगवति एकाग्रता तन्मयता तथा च भगवद्विरोधिषु तत्वेषु उदासीनतायाः प्रदर्शनमपि निरोधोऽस्ति । **विमर्शः**- भगवन्तं प्रति अनन्यताया आशयो वर्तते यत् सर्वेषामाश्रयीभूते सर्वज्ञे परमेश्वरे

तन्मयता । भगवतो चिन्तने ये विरोधिभावाः सन्ति तान् प्रति उदासीनतायाः भावस्य धारणं निरोधःअस्ति । अनन्यभावेन ईश्वराराधनं यःकरोति,भगवान् तस्य समुद्धर्ता भवति।उक्तञ्च-

**अनन्येनैव योगेन मां ध्यायन्त उपासते । तेषामहं समुद्धर्ता मृत्युसंसारसागरात् (गी.१२/६)**

**प्रसङ्गः**- पूर्वसूत्रोक्ता अनन्यता का ? इति दशमे सूत्रे उच्यते-

**अन्याश्रयाणां त्यागोऽनन्यता ॥ १० ॥**

अन्ये च आश्रयाः अन्याश्रयाः,तेषामिति, भगवन्तमतिरिच्य न मे कश्चन आश्रयः इति बुद्ध्या अन्येषाम् आश्रयाणां, त्यागः त्यजनं च अनन्यता अस्ति । वस्तुतः संसारात् विरागः भगवति रागः एव भक्तेः अनन्यता वर्तते, अन्येभ्यो मनसः अपसारणञ्च अनन्यतास्ति । **विमर्शः-** जनाःसंसारे प्रायेण ईश्वराश्रयं त्यक्त्वा धनस्य कर्मणः, बलस्य,यज्ञादीनां च आश्रयं कृत्वा मनःकामनाः पूरयन्ति, किन्तु एतावता भगवत्प्राप्तिरसंभवा । अतः **गीतायामुक्तम्-** सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज । अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः।६६।

**प्रसंगः**-भगवत्प्राप्तौ तस्मिन् अनन्या श्रद्धा भवेत् इति आवश्यकमस्त्येव,तदतिरिक्तं शास्त्रेषु वर्णितं लोकेषु च दृष्टं भगवदनुकूलमाचरणमपि पालनीयमेवेति एकादशे सूत्रे उच्यते-

**लोकवेदेषु तदनुकूलाचरणं तद्विरोधिषूदासीनता ॥ ११ ॥**

लोकवेदेषु= लोकव्यवहारे, वेदे च वर्णितकर्मसु, तदनुकूलाचरणं=भगवतः भक्तेःच अनुकूलम् आचरणं व्यवहारो वा करणीयम् । तद्विरोधिषु=भगवद्विरोधिषु व्यवहारेषु च, उदासीनता= औदासीन्यमपि धारणीयम् ।

**विमर्शः**- किं भगवद्भजने संलग्नो जनः वेदविहितं यज्ञादिकर्म परित्यजेत्, अथवा शास्त्रेषु वर्णितं चतुर्विधं कर्म त्यक्त्वा केवलं भवन्तमेव ध्यायेत् इति जिज्ञासायामत्र उक्तम्- नहि,लोकवेदेषु भगवत्प्रीत्यनुकूलं कथितं यदस्ति तन्न त्यक्तव्यम् । तत्तु आचरणीयमेव । किञ्च चतुर्विधकर्मसु नित्यं,नैमित्तिकं,काम्यमपि कर्म भगवन्तं समर्प्य एव विधेयम् । निषिद्धं तु कर्म सर्वथा परिहरणीयमेव । वस्तुतः शास्त्रीयं काम्यं कर्म बन्धकमेव भवति । नित्यं नैमित्तिकञ्चापि फलासक्तिं विहाय भगवत्समर्पणपूर्वकं विधेयमिति भावः ।

**प्रसङ्गः**-भक्तस्य कृते अन्याश्रयाणां त्यागः परमा भक्तिः यदि भवति तदा प्रश्नो जायते यत् किं शास्त्राश्रयणमपि त्यक्ततव्यं ? यदि शास्त्राश्रयणं न क्रियेत तदा भक्तिसूत्रादिशास्त्रस्य प्रणयनमपि व्यर्थं भवेदत उच्यते द्वादशे सूत्रे-

**भवतु निश्चयदार्ढ्यादूर्द्ध्वं शास्त्ररक्षणम् ॥ १२ ॥**

निश्चयदार्ढ्यात्= विधिनिषेधादिकमतीत्य भगवति अनन्यप्रेमप्राप्तेः दृढनिश्चयात् निर्णयात् , ऊर्द्ध्वम् = परमपि, शास्त्ररक्षणं भवतु= अस्तु इति ।शास्त्ररक्षणं कर्तव्यमेवेत्यर्थः ।

**विमर्शः**-यद्यपि दृढनिश्चयः भक्तः यावत्पर्यन्तमस्ति तावत् देहाभासः तस्य भवत्येव । सः यत् किमपि कुरुते तस्य तस्य ज्ञानन्तु अस्त्येव, अतः शास्त्रानुकूलमाचरणीयं भवति । यतो हि शास्त्रनिर्धारितनियमाः भक्तेः दृढीकरणे सहायकाः एव भवन्ति । लोकशिक्षायै अपि एतद् आवश्यकमस्ति । भगवान् श्रीकृष्णोऽपि गीतायाः षोडशाध्यायस्य चतुर्विंशे पद्ये अवोचत्-
**तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ । ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्तुमिहार्हसि ॥**
अतः साधकोऽपि भक्तः आवश्यकतां विनापि निश्चयदार्ढ्यात् परं शास्त्ररक्षणं कुर्यादिति अस्य सूत्रस्य आशयः प्रतिभाति ।